श्रीरस्तु श्रीराम शुभमस्तु

# प्रथमाग्निष्टोम सोमयाग आह्वान पत्रिका

**वन्हिमण्डलमध्यस्थम् तप्तजाम्बूनदप्रभम् ।**
**स्वाहास्वधासमायुक्तम् वन्दे यज्ञतनुंहरिम् ॥**





**यज्ञो हि श्रेष्ठतमङ्कर्म,** इत्यादि श्रुतिवचनैः

**सह यज्ञाः प्रजास्सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वम् एषवोस्त्विष्ट कामधुक्॥**

इत्यादि स्मृतिवचनैश्च कर्मान्तरापेक्षया यज्ञस्य श्रेष्ठतमत्वम् कामधेनुवत् सर्वफलप्रदातृत्वम् च अवगतम्। सत्स्वप्यनेक यज्ञेषु सर्वसोमयागानाम् मुखस्थानीयत्वात् दौर्बाम्हण्यापनोदकत्वात् च अस्त्येव प्रथमस्य ज्योतिष्टोमाग्निष्टोमस्य प्राधान्याधिक्यम्। प्रातस्मरणीयानाम् यजनयाजनादिषट्कर्मनिरतानाम् नित्यमुक्तानाम् श्रीमताम् **देन्दुकूरि वेङ्कटसुब्रह्मण्य सोमयाजिनाम्** कनिष्ठपुत्रेण अधीतसाङ्गस्वाध्यायेन अध्यापितानेकसच्छिष्येन आहितत्रेताग्निना **ब्रम्हश्री वीरराघव घनपाठीहविर्याजिना** श्रीमज्ञगद्गुरुणाम् श्री श्री श्री आदि शङकरभगवत्पादानाम् निखिलवैदिकमार्गप्रवर्तक तत्परंपरगतनिजसच्छिषयाणाम् च अनुग्रहाशीर्भिः विश्वनाथराजधान्याम् अविमुक्त वाराणस्याम् सर्वपापापहारिण्याः उत्तरवाहिन्याः गंगायाः तटे गंगानदीपुष्करसंवत्सरे **21-03-2024** शोभकृद्वर्षीयतपस्यासितद्वादशीबृहस्पतिवासरमारभ्य **25-03-2024** राकेन्दुवासरपर्यन्तम् प्रथमाग्निष्टोमयागः अनुष्ठीयते। तत्र समे यज्ञपुरुषसेवकाः सानन्दचित्ताः संभूय भूयो भूयः स्वर्णाज्यधान्यवस्त्रदिरुपाणि यज्ञोपकारकद्रव्याणि वितीर्य यज्ञपुरुषप्रसादम् प्राप्य यज्ञेश्वरानुग्रहेण आत्मानम् उध्दरेयुः इति

**इत्थम्**
**यज्ञपुरुषसेवकाः**
**सनातनधर्मानुयायिनः**

## कार्यक्रमविवरणम्

| | | |
|---|---|---|
| **21-03-2024** | गुरुवासरः | विघ्नेश्वर पूजा, अग्निष्टोमायगसंकल्पः, मधुपर्कः, यागशालाप्रवेशः, दीक्षणीयेष्टिः, सनीहारप्रस्थापनम् |
| **22-03-2024** | शुक्रवासरः | प्रायणीयेष्टिः, सोमक्रयणम्, आतिथ्येष्टिः, प्रातःप्रवर्ग्योपसदौ सुब्रह्मण्याह्वानम्, सायम्प्रवर्ग्योपसदौ |
| **23-03-2024** | शनिवासरः | प्रातःप्रवर्ग्योपसदौ सुब्रह्मण्याह्वानम्, वेदिकरणम, सायम्प्रवर्ग्योपसदौ |
| **24-03-2024** | रविवासरः | प्रवर्ग्योपसदौ, सुब्रह्मण्याह्वानम्, प्रवगर्योद्वासनम्, अग्नेषोमीय यागः, नामसुब्रह्मण्याह्वानम्, सवनीयान्वाधानम् |
| **25-03-2024** | सोमवासरः | महारात्रप्रयोगः, बहिष्पवमानस्तोत्रम्, सवनीययागः, सोमाहुतयः, दक्षिणादानम्, यज्ञपायसवितरणम्, अवभृथस्नानम्, गृहप्रवेशः |
| **26-03-2024** | मंगलवासरः | पूर्णमासेष्टिः, अग्नीषोमीययागारम्भः, महादाशीर्वचनम् सहस्रब्राह्मण संतर्पणम् |

**21-03-2024 दिनांकम् आरभ्य, महागणपति होमः, चतुर्वेद पारायणम्, आवहन्ती होमः, महानारायण होमः, महासौर होमः, चण्डीपायणम्, चण्डीहोमः, रुद्राभिषेकः, रुद्रहोमः**

**एते कार्यक्रमाः**

**25-03-2024 दिनांकपर्यन्तम् प्रतिदिनम् संचाल्यन्ते**

**लोकास्समस्तास्सुखिनोभवन्तु**

## यज्ञेश्वरभक्त बृन्दम्


| | |
|---|---|
| देदुकुरि श्रराम घनपाठी | 9422572783 |
| R. नारायण घनपाठी | 9839243042 |
| चंद्रशेखर द्रविड़ घनपाठी | 6381237749 |
| गुरुप्रसाद कूर्सेजी | 9616746287 |
| देदुकुरि वीरराघव घनपाठी | 9935108101 |

[redacted]